संस्कृत

फा.नं. १८५

स्तोत्र

पुष्पदंत माहिम्न स्तोत्र

५१८ | स्तो. १३८

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

श्रीगणेशायनमः॥अथमहिम्नप्रारंभः॥श्रीरामचंद्रोजयति॥
पुष्पदंतउवाच॥महिम्नःपारंतेपरमविदुषोयद्यसदृशीस्तुति
र्ब्रह्मादीनामपितदवसंनास्त्वयिगिरः॥अथावाच्यःसर्वःस्वम
तिपरिणामावधिगृणन्ममाप्येषस्तोत्रेहरनिरपवादःपरि
करः॥१॥अतीतःपंथानंतवचमहिमावाङ्मनसयोरतद्व्याव
त्यायंचकितमभिधत्तेश्रुतिरपि॥सकस्यस्तोतव्यःकतिविध
गुणःकस्यविषयःपदेत्वर्वाचीनेपततिनमनःकस्यनवचः॥ राम
२॥मधुस्फीतावाचःपरमममृतंनिर्मितवतस्तवब्रह्मन्किंवा १
गपिसुरगुरोर्विस्मयपदं॥ममत्वेतांवाणींगुणकथनपुण्येन

(1A)

भवतः पुनामीत्यर्थोऽस्मिन् पुरमथन बुद्धिर्व्यवसिता ॥ ३ ॥ त
वैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत्त्रयीवस्तु व्यस्तं तिसृषु
गुणभिन्नासु तनुषु ॥ अभव्यानामस्मिन्वरद रमणीयामरम
णीं विहंतुं व्याक्रोशीं विदधत इहैके जडधियः ॥ ४ ॥ किमीहः
किंकायः स खलु किमुपायस्त्रिभुवनं किमाधारो धाता सृजति
किमुपादान इति च ॥ अतर्क्यैश्वर्ये त्वय्यनवसरदुस्थो हतधि
यः कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः ॥ ५ ॥ अजन्मा
नो लोकाः किमवयववंतोऽपि जगतामधिष्ठातारं किं भवविधि
रनादृत्य भवति ॥ अनीशो वा कुर्याद्भुवनजनने कः परिकरो य

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2)

महिम्न तोमंदास्त्वांप्रत्यमरवरसंशेरतइमे ॥६॥ त्रयीसांख्यंयोगः प
२ शुपतिमतंवैष्णवमितिप्रभिन्नेप्रस्थानेपरमिदमदः पथ्यमिति
च ॥ रुचीनांवैचित्र्यादृजुकुटिलनानापथजुषांनृणामेकोगम्य
स्त्वमसिपयसामर्णवइव ॥७॥ महोक्षः खट्वांगंपरशुरजिनंभ
स्मफणिनः कपालंचेतीयत्तववरदतंत्रोपिकरणं ॥ सुरास्तां
तामृद्धिंदधतितुभवद्भ्रूप्रणिहितांनहिस्वात्मारामंविषयमृग
तृष्णाभ्रमयति ॥८॥ ध्रुवंकश्चित्सर्वंसकलमपरस्त्वध्रुवमिदं राम
परोध्रौव्याध्रौव्येजगतिगदतिव्यस्तविषये ॥ समस्तेप्येत २
स्मिन्पुरमथनतैर्विस्मितइवस्तुवन्जिह्रेमित्वांनखलुननुधृष्टा

A project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2A)

मुखरता॥९॥तवैश्वर्यंयत्नाद्यदुपरिविरिंचोहरिरथःपरिछे
त्तुंयातावनिलमनिलस्कंधवपुषा॥ततोभक्तिश्रद्धाभरगु
रुभ्यांगिरिशयःस्वयंतस्थेताभ्यांतवकिमनुवृत्तिर्नफलति॥१०
अयत्नादापाद्यत्रिभुवनमवैरव्यतिकरंदशास्योयद्बाहूनभृतरण
कंडूपरवशान्॥शिरःपद्मश्रेणीरचितचरणांभोरुहबलेःस्थिरा
यास्त्वद्भक्तेस्त्रिपुरहरविस्फूर्जितमिदं॥११॥अमुष्यत्वत्सेवास
मधिगतसारंभुजवनंबलात्कैलासेपित्वदधिवसतौविक्रमयतः
॥अलभ्यापातालेप्यलसिचलितांगुष्ठशिरसिप्रतिष्ठात्वय्या
सीध्रुवमुपचितोमुह्यतिखलः॥१२॥यदृद्धिंसुत्राम्णोवरद

महिम्न परमोच्चैरपिसतीमधश्चक्रेबाणः परिजनविधेयस्त्रिभुवनः॥
३ नतश्चित्रंतस्मिन्वरिवसितरित्वश्चरणयोर्नकस्याप्युन्नत्यैभ
वतिशिरसस्त्वय्यवनतिः॥१३॥ अकांडब्रह्मांडक्षयचकितदे
(3) वासुरकृपाविधेयस्यासीद्यस्त्रिनयनविषंसंहृतवतः॥ स
कल्माषः कंठेस्तवनकुरुतेनश्रियमहोविकारोपिश्लाघ्यो
भुवनभयभंगव्यसनिनः॥१४॥ असिद्धार्थानैवक्वचिदपि
सदेवासुरनरेनिवर्त्तंतेनित्यंजगतिजयिनोयस्यविशिखाः॥ राम
सपश्यन्नीशत्वामितरसुरसाधारणमभूत्स्मरःस्मर्तव्यात्मान ३
हिवशिषुपथ्यः परिभवः॥१५॥ महीपादाघाताद्व्रजतिसह

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai, eGangotri project

(3A)

सासंशयपदंपदंविष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणं॥मुहु
र्द्यौर्दौस्थ्यंयात्यनिभृतजटाताडिततटाजगद्रक्षायैत्वंनटसिननुवामै
वविभुता॥१६॥वियद्व्यापीतारागणगुणितफेनोद्गमरुचिःप्रवाहो
वारांयःपृषतलघुदृष्टःशिरसिते॥जगद्द्वीपाकारंजलधिवलयं
तेनकृतमित्यनेनैवोन्नेयंधृतमहिमदिव्यंतववपुः॥१७॥रथ
क्षोणीयंताशतधृतिरगेंद्रोधनुरथोरथांगेचंद्रार्कौरथचरणपा
णिःशरइति॥दिधक्षोस्तेकोयंत्रिपुरतृणमाडंबरविधिर्विधेयैः
क्रीडंत्योनखलुपरतंत्राःप्रभुधियः॥१८॥हरिस्तेसाहस्रंकमल
माधायपदयोर्यदेकोनेतस्मिन्निजमुदहरंनेत्रकमलं॥गतोभ

महिम्न क्त्युद्रेकः परिणतिमसौचक्रवपुषात्रयाणांरक्षायैत्रिपुरहर
५ जागर्तिजगतां॥१९॥क्रतौसुप्तेजाग्रत्त्वमसिफलयोगेक्रतु
मतांक्वकर्मप्रध्वस्तंफलतिपुरुषाराधनमृते॥अतस्त्वांसं
(५) प्रेक्ष्यक्रतुषुफलदानप्रतिभुवंश्रुतौश्रद्धांबध्वादृढपरिक
रः कर्मसुजनः॥२०॥क्रियादक्षोदक्षःक्रतुपतिरधीशस्त
नुभृतामृषीणामार्त्विज्यंशरणदसदस्याःसुरगणाः॥क्रतु
भ्रेषस्त्वत्तःक्रतुषुफलदानव्यसनिनोध्रुवंकर्तुःश्रद्धाविधु राम
रमभिचारायहिमखाः॥२१॥प्रजानाथंनाथप्रसभमभि ५
कंस्वांदुहितरंगतंरोहिद्भूतांरिरमयिषुमृषस्यवपुषा॥ध

(5A)

नुःपाणेर्यातंदिवमपिसपत्राकृतममुंत्रसंतंतेद्यापित्यजतिनमृ
गव्याधरभसः॥२२॥स्वलावण्याशंसाधृतधनुषमह्नायतृण
वत्पुरःप्लुष्टंदृष्ट्वापुरमथनपुष्पायुधमपि॥यदिस्त्रैणंदेवीयम
निरतदेहार्धघटनादवैतित्वामद्धाबतवरदमुग्धायुवतयः॥
२३॥स्मशानेष्वाक्रीडास्मरहरपिशाचाःसहचराश्चिताभस्माले
पःस्रगपिनृकरोटीपरिकरः॥अमंगल्यंशीलंतवभवतुनामैव
मखिलंतथापिस्मर्तॄणांवरदपरमंमंगलमसि॥२४॥मनः
प्रत्यक्चित्तेसविधमविधायात्तमरुतःप्रहृष्यद्रोमाणःप्रमु
दसलिलोत्संगितदृशः॥यदालोक्याह्लादंह्रदइवनिमज्ज्या

महिम्न म्रतमयेदधत्यंतस्तत्वंकिमपियमिनस्तत्किलभवान्॥२५॥
५ त्वमर्कस्त्वंसोमस्त्वमसिपवनस्त्वंहुतवहस्त्वमापस्त्वंव्योमस्त्व
मुधुरणिरात्मात्वमिति च॥परिछिन्नामेवंत्वयिपरिणताबिभ्रति
(5) गिरंनविद्मस्तत्तत्वंवयमिहतुयत्त्वंनभवसि॥२६॥त्रयींतिस्रो
वृत्तिस्त्रिभुवनमथोत्रीनपिसुरानकाराद्यैर्वर्णैस्त्रिभिरभिदध
त्तीर्णविकृति॥तुरीयंतेधाममुध्वनिभिरवरुंधानमणुभिःस
मस्तव्यस्तंत्वांशरणदगृणात्योमितिपदं॥२७॥भवःशर्वोरु राम
द्रःपशुपतिरथोग्रःसहमहांस्तथाभीमेशानावितियदभिधा ५
नाष्टकमिदं॥अमुष्मिन्प्रत्येकंप्रविचरतिदेवःश्रुतिरपिप्रि

Joint project of Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5A)

यायास्मेधाम्नेत्रविहितनमस्योस्मि भवति ॥२८॥नमोनेदि
ष्ठायप्रियदवदविष्ठायचनमोनमः क्षोदिष्ठायस्मरहरमहिष्ठाय
चनमः॥नमोवर्षिष्ठायत्रिनयनयविष्ठायचनमोनमःसर्व
स्मैतेतदिदमितिशर्वायचनमः॥२९॥बहलरजसेविश्वोत्प
त्तौभवायनमोनमःप्रबलतमसेतत्संहारेहरायनमोनमः॥
जनसुखकृतेसत्वोद्रिक्तौमृडायनमोनमःप्रमहसिपदेनि
स्त्रैगुण्येशिवायनमोनमः॥३०॥कृशपरिणतिचेतःक्लेश
वश्यंक्वचेदंक्वचतवगुणसीमोल्लंघिनीशश्वदृद्धिः॥इति
चकितममंदीकृत्यमांभक्तिराधाद्वरदचरणयोस्तेवाक्यपु

Joint project of the Rajwade Sanshodhan Mandal Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

महिम्न ष्पोपहारं ॥३१॥ असितगिरिसमंस्यात्कज्जलंसिंधुपात्रे सु
६ रतरुवरशाखालेखनीपत्रमुर्वि ॥ लिखितयदिगृहीत्वाशारदा
सार्वकालंतदपितवगुणानामीशपारंनयाति ॥३२॥ असुर
(६) सुरमुनींद्रैरर्चितस्येंदुमौलेः ग्रथितगुणमहिम्नोनिर्गुणस्येश्व
रस्य ॥ सकलगणवरिष्ठःपुष्पदंताभिधानोरुचिरमलघुवृत्तैः
स्तोत्रमेतच्चकार ॥३३॥ अहरहरनवद्यंधूर्जटेःस्तोत्रमेतत्पठ
तिपरमभक्त्याशुद्धचित्तःपुमान्यः ॥ सभवतिशिवलोकेरुद्र राम
तुल्यःप्रभावात्प्रचुरतरधनायुःपुत्रवान्कीर्तिमांश्च ॥३४॥ ६
कुसुमदशननामासर्वगंधर्वराजःशशिधरवरमौलेर्देवदेव

(6A)

स्यदासः॥सनिजगुहमहिम्नोभ्रष्ट एवास्यरोषास्त्तवनमिदम
कार्षीद्दिव्यादिव्यंमहिम्नः॥३५॥सुरवरमुनिपूज्यंस्वर्गमोक्षैक
हेतुंपठतियदिमनुष्यःप्रांजलिर्नान्यचेताः॥व्रजतिशिवसमीपं
किंनरैस्तूयमानस्त्तवनमिदममोघंपुष्पदंतप्रणीतं॥३६॥श्री
पुष्पदंतमुखपंकजनिर्गतेनस्तोत्रेणकिल्बिषहरेणहरप्रियेण
॥कंठस्थितेनपठितेनसमाहितेनसुप्रीणितोभवतिभूतपति
र्महेशः॥३७॥महेशान्नापरोदेवोमहिम्नोनापरास्तुतिः॥अ
घोरान्नापरोमंत्रोनास्तितत्वंगुरोःपरं॥३८॥दीक्षादानंतप
स्तीर्थंदानयागादिकाःक्रियाः॥महिम्नस्तवपाठस्यकलां

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan ... Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com